इति वाच्यं सर्वकालमित्यस्य यावत्सत्त्वमित्यर्थात् अतः त्वत्कृतः प्रतिषेधो न सम्भवति मतान्तरे तु अनित्येऽनित्यत्वोपपन्ने हेतोस्त्वपायः प्रतिषेधः कृतः स च सम्भवतीत्यर्थः” वृत्तिः ।

“प्रयत्नकार्य्यानेकत्वात् कार्य्यसमः२४” सू० ।

“कार्य्यसमं लक्षयति । प्रयत्नकार्य्यस्य प्रयत्नसम्पादनीयस्यानेकत्वात् अनेकविषयत्वात् । अयमर्थः शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्य्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कीलकादावपि दृष्टन्तत्र द्वितीयं न तज्जन्यत्वसाधकं आद्ये तु असिद्धं तथा च सामान्यत उक्ते हेतोरनभिमतविशिष्टनिराकरणेन प्रत्यवस्थानं कार्य्यसमा२४असिद्धदेशनाभासा चेयम् । अथ वा प्रयत्नकार्य्याणां प्रयत्नकर्त्तव्यानां कर्त्तव्यप्रयत्नानामिति यावत् तादृशानां अनेकविधत्वात् युक्तान्यस्य व्याघातकमुत्तरं कार्य्यसमा तथा चास्या आकृतिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः यथा त्वत्पक्षे किञ्चिद्दूषणं भविष्यतीति शङ्काऽपि शङ्का समा कार्य्यकारणभावस्योपकारनियतत्वेऽनवस्थेत्यनुपकारसमा इत्यादिः” वृत्तिः ।

“कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः” सू० ।

“अत्रोत्तरम् । शब्दस्य कार्य्यान्यत्वेऽकार्य्यत्वे प्रयत्नस्य वक्तृप्रयत्नस्य अहेतुत्वम् अकारणत्वम् इदञ्च तदा स्यात् यद्यनुपलब्धिकारणमावरणादिकमुपपद्यते न च तच्छब्देऽस्तीत्यर्थः । आकृतिगणपक्षे तु कार्य्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वं असाधकत्वाभावः उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् तद्वाक्यस्य स्वव्याघातकत्वादित्यर्थः” वृत्तिः ।

१४स्वभावे जातिवैरम् जातिसुन्दरम् । जातिश्च प्रकारविशेष्यतया वा शब्दशक्तिज्ञानविषयः । तत्र प्राभाकरमते आकृतिव्यङ्ग्याया एव जातित्वं न गुणत्वादीनां नैयायिकमते तु अनुगतैकबुद्धिनियामकत्वात् नित्यत्वे सति अनेकसमवेतत्वरूपलक्षणयोगाच्च गुणत्वादीनामपि जातित्वमस्त्येव । “समानप्रसवात्मिका जाति गो०सूत्रभाष्ययोस्तथैवोक्तेश्च । जातिशक्तिवादशब्दे च तद्बाधनं दृश्यम् । अतएव “द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते । परभिन्ना तु या जातिः सैवापरतयोच्यते । द्रव्यत्वादिकजातिस्तु परापरतयोच्यते” भाषायामुक्तम् । छन्दोभेदश्च । “पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्” छन्दोमञ्जर्य्युक्तेः मात्राकृतं छन्दः । “इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी” छन्दोम० । इष्टजातिशेषजातिविश्लेषजातिप्रभृतयश्च प्राचीनानामिष्टकर्मसंज्ञाभेदा लीलावत्यादौ इष्टकर्म्मप्रकरणे दृश्याः । “सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च” काव्यप्र० । “असम्भाव्यतः कश्चिदर्थं जातिक्रियागुणैः” माघः । ब्राह्मणादिजातौ “जात्या काममवध्योऽसि चरणं त्विदमुद्धृतम्” वेणीसं० “ब्राह्मणस्य ब्राह्मणयोर्ब्राह्मणानाञ्च संवधे । प्रायश्चित्तस्य चैकत्वं जातिस्त्वाश्रित्य लक्ष्यते” प्रा०त० । जन्मनि “आचार्य्यस्तस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या सा नित्या साऽजराऽमरा” मनुः । आकारव्यङ्ग्ये “स्वर्णमणिसूत्रायःकाष्ठवल्कलवाससाम् । अजातौ जातिकरणे विक्रेयाष्टगुणोदमः” याज्ञ० । १५जातिवाचकशब्दे च “पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः” “कत्यतुल्याख्या अजात्या” “जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यात्”(ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः) “जातेरस्त्रीविषयादयोपधात्” इति च पा० ।

**जातिकोश(ष)** पु० न० जातेः जातीफलस्य कोशमिव । (जायफल) जातीफले भावप्र० “जातीफलं जातिकोशः मालतीफलमित्यपि । जातिफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं ग्राहि स्वर्य्यं श्लेष्मानिलापहम् । निहन्ति मुखवैरस्यमलदौर्गन्ध्यकृष्णताः । कृमिकासवमिश्वासशोषपीनसहृद्रुजः” भावप्र० । हेमचन्द्रे अयं मूर्द्धन्यवान् दीर्घमध्यश्च पठितः ।

**जाति(ती)कोषी** स्त्री जातिं जातिफलं कुष्णाति कुष—निष्कर्षे—अण् उप०स०गौरा० ङीष् । जातीफले राजनि० ।

**जातिधर्म्म** पु० ६त० । ब्राह्मणादीनां धर्मभेदे । स च भा० शा० ६० अ० दर्शितो यथा

“ब्राह्मणस्य तु यो धर्मस्तन्ते वक्ष्यामि केवलम् । इममेव महाराज ! धर्ममाहुः पुरातनम् । स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते । तञ्चेद्वित्तमुपागच्छेद्दरमानं स्वस्वकर्मणि । अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् । कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च । संविभज्य हि भोक्तव्यं धनं सद्भिरितीर्य्यते । परिनिष्ठितकार्य्यस्तु